यशः शियति रोदस्योर्यस्य धर्मैरतात्मनः ॥ ११२ ॥
दण्डं जोड़यति दिट्सु यशं तेषां च जोड़ति।
तानस्वदण्डतापघ्नान् स्वदण्डेन जुड़त्यसौ ॥ ११३ ॥
अर्थं राध्नोति विप्रार्थं अध्वनानि च राध्यति।
यत्प्रसादाज्जनः सर्वः सततं राध्यति श्रिया ॥११४॥
यो मोषति परद्रव्यं तस्य मुष्णाति यः शिरः।
मुष्णत्यपहृतार्थानां दुःखं धनसमर्पणात् ॥ ११५ ॥
भक्त्यार्ज्जयति यो विप्रान् गुरून् देवांस्तथार्ज्जति।
अर्ज्यन्ते परवो यस्य मौलिरत्नांशुभिर्नृपाः ॥ ११६ ॥
यद्व्ययति द्रव्यं तदर्थं यो व्ययत्वरीन्।
व्ययते यद्व्ययोद्विग्नं त्रैलोक्यादर्थतां मतम् ॥११७॥

यश. कीर्तिः, रोदस्योः द्यावाभूम्योरन्तराले, शियति वर्धते शि वाडे श्यन च दीर्घादिश्च प्रयोगः। ११२।

दिट्सु सर्वासु, दण्डं जोड़यति प्रेरयति, प्रयुङ्क्ते इत्यर्थः। स्वदण्डतापघ्नान् स्वापराधजनान्, तान् शिवः, दण्डेन जुड़ति यच्छति। ११३।

विप्रार्थं ब्राह्मणभोजनार्थं, अन्नं अर्थं, राध्नोति सम्पादयति। श्रिया सम्पदा, राध्यति सम्पन्नो भवति। ११४।

मोषति अपहरति। मुष्णाति छिनत्ति। अपहृता: अर्था: धनानि येषां ते, ताहशानां अर्पणात्। ११५।

मौलिषु किरीटेषु, 'मौलिः किरीटे धम्मिले चूडायद्देविचूर्णके' इति हैमः, यानि रत्नानि, तेषाम् अंशुभिः किरणैः, चूडानखिमरीचिभिरित्यर्थः, अत्र परवो, अर्च्यन्ते पूज्यन्ते ॥ ११६।

यद् धनं, द्रव्यं धनम्, अवयति उत्सृजति उत्पात्रेभ्यो ददातीत्यर्थः।

अर्हति विधवा हर्षमर्हते दुरितोदयम्।
वर्धापयति दारिद्र्यं दीनानां दर्शनं ददत् ॥११८॥
आदत्ते विविधं आयु आदत्ते च रसायनम्।
आप्यायति सर्वेषां विषयाणां सुखानि यः ॥११९॥
यत्र विच्छति तद्राष्ट्रो यत्र विच्छायति क्षयम्।
विच्छायति तत्राऽक्षी सुपतीनां सुखान्वयम् ॥ १२० ॥
न बिभेति नरेन्द्रेभ्यो देवेभ्योऽपि न भेषति।
एकजात् भेषते धर्म्याच्च भेषत्त्वयशोक्षतः ॥ १२१ ॥

सदर्शं सत्पात्रेषु विनियोगार्थं, धरीव् बहून्, ददति यच्छति, प्रपुष्पः प्रसन्न विद्याम्बादत्तरति भावः। 'आदानं हि विसर्गाय सतां वारिमुचामिव' इति रघुः ॥ ११० ॥

दुरितोदयं पापक्रियोदयादुर्भावं, अर्हते निराकरोति। हर्षिं, भर्गं, ददत् प्रयच्छत् सन्, दीनानां दरिद्राणां, दारिद्र्यम् अर्हयति नाशयति ॥ ११८ ॥

रसायनं नाम विषहरौरस्यैः आग्निपुटिकाकारीष्टादिकरी भेषजविशेषैः, बहुलं भेषजे, दीर्घमायुः अपि भेषाभावीत्यं सदर्थं यथः। ईर्ष्यादिपदत्वं आप्यिं नदी विन्देरसायमान्। इति। आदत्ते गृह्णाति। विषयाणां दिव्य-दृपरसगन्धादीनाम् ॥ ११९ ॥

यद्राष्ट्रः यत्र राज्ञः सुखार्थं सुरक्षितं क्षेत्रं, यत्र विच्छति गच्छति। क्षयं यत्र विच्छायति गच्छति। तत्र सुपतीनां प्रतिपक्षाणां राज्ञां, सुखान्वयं सुखाधारत्वं वस्तु, विच्छायति अपगच्छति। विच्छायतीत्यत्र 'विच्छाऽवुति-पक्षीयाद्' इत्यादः, तदी धातुसंज्ञा ॥ १२० ॥

ईर्ष्यः इन्द्रादिभ्यः, न भेषति बिभेति, यद्वेषु सततम् इन्द्रादीनां सर्व-दाम् यत्र यजनादिलक्षणदुर्भिक्षादिदैवव्यसनेभ्यो भयं न आपद्यतिभावः।

यं क्षणत्ति गुणग्रामः क्षन्तव्यरिपुरांसि यः।
कीर्त्तयन्ति च गोष्ठीषु यद्गुणानप्सरोगणाः॥ १२२॥
न्यञ्चते प्रत्यहं मोहो यस्मान्न्यञ्चन्ति चाऽरयः।
अञ्चयन्ति सदा यञ्च गुणाः सर्व्वातिशायिनः॥ १२३॥
न कुप्यति बुभुक्षार्त्तः शीतार्त्तश्च न कुप्यति।
यस्य राष्ट्रे धनाढ्यो वा मृतः कोऽपि न कुप्यति॥१२४॥

अत्राह कामन्दकः, 'हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा। इति पञ्चविधं दैवं मानुषं व्यसनं ततः। आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात्। पृथिवीपतिलीभाच्च नराणां पञ्चधा मतम्॥ इति॥ १२१॥

गुणग्रामः दयादाक्षिण्यादिसद्गुणसमूहः, यं राजानं, क्षणत्ति वेष्टते समाश्रयतीति यावत्। क्षन्तव्यरिपुरांसि क्षमणीयशत्रुशरीराणि छिनत्ति। अप्सरोगणा उर्व्वशीमेनकाद्या दिव्याङ्गनाः, यदुक्तं वह्निपुराणे, 'उर्व्वशी मेनका रम्भा मिश्रकेशी घृताच्यपि। विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा। भानुमत्यवला वर्षा दशमाप्सरसः प्रभाः'॥ इति। गोष्ठीषु सभासु, 'गोष्ठी सभायामाख्याने' इति विश्वः। यद्गुणान् कीर्त्तयन्ति उच्चैर्गायन्ति॥ १२२॥

यस्मात् मोहः अज्ञानं, न्यञ्चते अपनञ्चति। अरयः शत्रवः, यस्मात् राज्ञः, न्यञ्चन्ति अपसरन्ति यद्भयात् पलायमानत्वर्थः। सर्व्वान् अतिशाययन्ति परानभवन्तीति सर्व्वातिशायिनः अनन्यसाधारणात्वर्थः, गुणाः शौर्य्यादयः, यं राजानं, अञ्चयन्ति विशेषयन्ति भूषयन्तीति यावत्॥ १२३॥

बुभुक्षार्त्तः क्षुधापीडितजनः, न कुप्यति क्षिप्यति। शीतार्त्तः शीतपीडितश्च जनः, न कुप्यति क्षिप्यति। यस्मै राज्ञा यत्नैः क्षुधितानां यत्नेन च शीतार्त्तानां क्षीणधनवतीत्वर्थः। धनाढ्यो जनः, न कुप्यति परान् क्षिप्यति, राजदत्तधनादयत्वेनौ दुर्धनान् नाऽभिधायत्वरतिभावः। यतः कोऽपि न कुप्यति पूतिदग्धनाशयति, यद्राज्ञानां यत्नाना राज्ञैवाऽन्नोद्दिं करोतीतिभावः॥१२४॥

विचारयति यो धर्मं विदद्भिर्ब्राह्मणैः सह ।
विचारयत्यस्य लोके शरच्चन्द्रोज्ज्वलं यशः ॥ १२५ ॥
अविद्यानिद्रयाक्रान्ते जगत्येकः स चेतति ।
धिया चेतयते सर्वं परस्य हृदये स्थितम् ॥ १२६ ॥
यो भुजाभ्यां भुवो भारं भरते भरतोपमः ।
बिभर्त्ति च यशोराशिं भूयांसं यस्य भूरपि ॥ १२७ ॥
यस्य रोषारुणा दृष्टिर्धावते यत्र शात्रवे ।
पाशपाणिस्ततस्तस्मिन् यमदूतोऽभिधावति ॥ १२८ ॥
शास्त्रेण स्तोभते भूयो लघुप्रज्ञतिको नरः ।
न क्षुभ्नाति महात्माऽसौ न क्षुभ्नोत्यच्चतस्ततः ॥ १२९ ॥
प्राणिङ्क्ते दक्षिणीयानां विप्राणाञ्चरणैव यः ।
यत्पादौ मौलिरत्नांशुजालैर्नैनेक्ति राजकम् ॥१३०॥

अविद्या अज्ञानं, सैव निद्रा चैतन्यनिमीलनात् निद्राखरूपिणीत्यर्थः, तया आक्रान्ते अभिभूते जगति, एकः केवलः, स चेतति जानर्त्ति, ज्ञानचक्षुषा सर्वं पश्यतीत्यर्थः ॥ १२६ ॥

भरतोपमः दुष्मन्तात्मजभरतराजसदृशः, यथा मनुस्मृत्यः, यदुक्तं वायुपुराणे, 'भरणात् प्रजानां वै मनुर्भरत उच्यते । निरुक्तवचनाचैव वर्षं तद्भारतं स्मृतम् ॥ इति । भरते धारयति ॥ १२७ ॥

यस्य राज्ञः, रोषारुणा क्रोधताम्रा, दृष्टिः यत्र शात्रवे अनुसरणे, धावते विपतति । पाशपाणिः रज्जुहस्तः, यमदूतः तत्सिन् अनुसरणे इति शेषः, अभिधावति, कुपितः सन्परं रिपुकबन्धूज्जयतीति भावः ॥ १२८ ॥

दक्षिणानर्हन्तीति दक्षिणीयाः, तेषां ब्रह्मर्षीणामीदृशानां महानुभवानां इत्यर्थः, तेषां चरणैः पादैः, प्राणिङ्क्ते आक्रामं पुनाति । राजकं सपक्षभूः,

मुनेः भर्तरि दुःखार्ताः क्लिम्यन्ति यद्वरस्त्रियः ।
यत्रत्यमधुभिस्त्राक्षां क्लिद्यन्ति नयनानि च ॥ १२१ ॥
न यत्रवति बीजानि यत्र वित्रजी स्थलः ।
यन्दधाति धनुर्वेद योग्यत्वादेषु सायकम् ॥ १२२ ॥
दोर्भ्यां यो विपतां दर्पं भन्नवत्याक्षनेयवत् ।
भनक्ति वामिनीनाच हृदया मानभङ्गवत् ॥ १२३ ॥
यत्र वेवेक्ति वेदान्तं गाङ्गाम्भोवेग सर्व्वदा ।
विधिनक्ति च यत्पूजामाजौ सत्यङ्गच यः ॥ १२४ ॥
आम्नायन्ते यतः प्राप्य यज्ञभागान् दिवौकसः ।
प्रभूतधनसम्पत्तेराम्नायन्ते च यत्प्रजाः ॥ १२५ ॥

मौक्तिकोद्वजालैः चूडामणिकरौघैश्च, यत्र राज्ञः पादौ, नेमेनि प्रणमति रञ्जयतीति यावत् । ११० ।

क्लिन्दन्ति यदन्ति । भनक्ति क्लिद्यन्ति आर्द्राणि भवन्ति । १२१ ।

यन्दधाति यन्धिं करोति । यन्दधाति बीजयति । सायकं यावत् ।१२२।

यात्रनेयवत् अनुजावित्र, दोर्भ्यां बाहुभ्यां, विपतां दर्पं अपूर्वां मर्दं, भनक्ति यन्नयति, यत्रनेय अनुजयत्वेन रिपुत्वं निहन्तीति भावः । भनक्तवत् अन्तर्पदत्व, यामिनीभनीशाक्षतिरित्यर्थः, स राजा, हृदया यान्तोक्तेनैव, यामिनीनां यानं यत्रैवादिसहस्रत्व बीजं, भनक्ति निराकरोति । १२३ ।

यात्री वृद्धे, अपूर्वा यन्नवन् पर्वतवत्, दवीयोवनिमर्थः, विधिनक्ति यन्नयति । १२४ ।

दिवम् बीजः यात्रं येषां ते दिवौकसः देवाः, दिवं यर्वेऽमरीये नेवि विदः । बीः बीज इति यत्रे इवीदरादिलात् यात्रः । यतः यस्मात् राज्ञः, यन्नयात्रात् शात्र, यान्नायन्ते श्रीयन्ते । १२५ ।

यो दे व्यायच्छते नित्यं विधित् किल न मेहति।
इति व्यायामशीलोऽसौ मलाक्तायी न जीवति ॥१२६॥
युवे छधीति मनूचां वारत्राम् मायपङ्क्तिभिः।
हत्वा मलाभ्यारत्र तेषां क्षीयति यः त्रिवम् ॥१२७॥
इतार्चिंतरत्नाऽर्चिंषाजर्धते यो रत्नाग्नी।
धर्षांयते धूपायत्र यशोऽत्यन्त परैः सह ॥ १२८ ॥
धीरत्नाधीरचाक्रान्ता विनीता यत्र वारत्राः।
जात्या धुर्व्याव धूर्यन्ते साधुभिः साधु वाहिताः ॥१२९॥
यस्मिन् समुदिते रात्रि जनः संक्षीयति क्षितौ।
संकुचत्यरिनारीणां मुखं पद्मेवदप्युत ॥ १३० ॥

त्रिवं प्रतिदिनं, व्यायच्छते यमनवद्विपुलायव्यायार्थं व्यायामं करोति, इत्यत्र, व्यायं व्यायामयोग्यं क्षीरं क्षीरवद्विपुलं। दोषवतीऽग्निरग्निरिव व्यायामादुपजायते। इति। मेहते क्षिपति यमनजलादौ भवतीति वायम्। मेहति वाग्यति। १२६।

मायपङ्क्तिभिः मरुत्सूनैः, वारत्राम् यमान्, छधीति क्षिपति। १२७।

रत्नाग्नी युवसूनी, इतार्चिंतः इतसंधुक्षितः, अर्चिंजान् पावक इव, धर्षते धृष्यति, धमनिनीव तेजसा दीप्यतइत्यर्थः। १२८।

धीरत्नैः धनवारीरैः, धाक्रान्ताः धर्षिताः, 'धीरत्ना धनिपवा इत्यादिः' रत्नवरः। विनीताः शिक्षिताः, यत्र वारत्राः यमिनः, धीरन्ति मतिधातुर्थं प्रज्ञीभवन्ति, धीर मतिधातुर्थंरत्नत्र मुदादिश्चीवत्र प्रत्ययः। साधुभिः सुधर्मैः वारविभिरित्यर्थः, साधु सदु यथा स्यात् तथा, वाहिताः प्रेरिताः, जाताः जेष्टाः, पुरं भारं वहन्तीति धुर्याः धुरा:, रत्नाग्नी-इत्यर्थः, धूर्यन्ते यान्ति, धूर् अतादित्वत्र दिवादिश्चीवत्र प्रत्ययः। ११९।

यस्मिन् रात्रि, क्षितौ पृथिव्यां, समुदिते चन्द्रोदयं भवति सति, जनः

नाऽवर्षं द्वीपति द्वारि यस्य कविदुपद्रवम् ।
द्वीपयन्ति पुनः सर्वं दीर्घमायुर्यदान्विताः ॥ १४१ ॥
उड्डीयन्ते धरा यस्य कोटिशः समराङ्गने ।
भग्नानामरिसैन्यानामुड्डयन्ते रजांसि च ॥१४२॥
यो खिन्नेनाऽनुमयते खलमप्यरिचेष्टितम् ।
न चाऽनुमाययत्यन्यस्तस्य यच्चेतसि स्थितम् ॥१४३॥
मृद्नाति द्विषतां दर्पं यो भुजाभ्यां भुवः पतिः ।
मर्दन्ते चरणौ यस्य विदिशः शरणं गताः ॥ १४४ ॥

जनः, क्षीणयति निर्धनयति, सर्वस्वहीनं करोतीत्यर्थः । पक्षे-वहवृद्धि चरद्विषद्वन्दम्, चरिनारीणां वदीयरिपुसुन्दरीणां, सुखं, संकुचति निर्धनयति, पतिनाशजनितेन शोकेन मलिनं भवतीत्यर्थः । १४० ।

चरवं निन्दां, उपद्रवम् उत्पातं, राजापराधजन्यम् अकालवज्रदुर्भिक्षादि-अवगमित्यर्थः, द्वीपति आवेदयति । यदान्विताः सर्वे यदधिष्ठिताः सर्व्याः प्रजायाः इत्यर्थः, दीर्घम् बहु: पक्षवायुषं, द्वीपयन्ति प्रचारयन्ति, पुरुषायुष-द्वीपिनी विदधतीत्यर्थः प्रजाधिष्ठितदेशे दीर्घमायुरिति भावः । १४१ ।

उड्डीयन्ते उत्पतन्ति । भग्नानां पलायमानपराङ्मुखानाम् । १४२ ।

खिन्नेन खिन्नेन, खलम् मिथितम् चरित्रेष्टितं परमण्डलकार्यम्, अनुमन्यते जानाति, प्राप्ता च प्रायेण सत्प्रतीकारोपायं चिन्तयतीति भावः । अन्यः अपरः, यस्य चेतसि मनः स्थितं सदीयम् इङ्गितमित्यर्थः, न अनुमाययति अवगच्छति सदीयेति, अविज्ञातप्रायेङ्गितज्ञो राजेति भावः । यथा चोक्तं, पुत्रेणाऽरिसुतस्याथ भावो मित्रं खलेऽथवा । नाऽज्ञ स्थितं परोक्षेऽपि विद्याच्चित्रं परस्य तु । दृष्ट्वेत् दृष्ट्वे स्वाकारानि स्वेद विवरणाननः ॥ इति ॥१४३॥
मर्दनं संपूर्णयति सर्वथा अपहरतीति यावत् । मर्दन्ते संपादयन्ति ॥१४४॥

मिलन्ति प्रत्यहं यस्य वाजिवारणसम्पदः ।
मीलन्ति रिपुनारीणां मुखपद्मवनानि च ॥ १४५ ॥
यस्य व्याघोटते दण्डो नाक्षतार्थः कृतक्षण ।
व्याघुटन्ति विपक्षाश्च यत्पक्षमुपागताः ॥ १४६ ॥
यो वाग्मी वादिनां मध्ये वाचमुक्षैः प्रपद्यते ।
प्रपद्यन्ति यत्कीर्तिं दिङ्मुखेषु महाजनाः ॥ १४७ ॥
यस्य न्यायार्जितैर्वित्तैः पूज्यमाना दिने दिने ।
तुष्यन्ति ब्राह्मणा नित्यं तुष्यन्ति कुलदेवताः ॥ १४८ ॥
मनो मोदिष्यते यस्य ददतोऽर्थमदर्थिभ्यम् ।
उदितस्य च संसाराद्दाक्षवेदिनः ॥ १४९ ॥
भेदते न परं कश्चित् स्वामी यः समदर्शनः ।
तं निन्दति परीवादं परश्च विदधाति यः ॥ १५० ॥

वाजिनो घोटकाः, वारणा करिणः, तत्पदी धनरत्नानि च, यस्य वाजिवारणरूपाः सम्पदः । मिलन्ति एकत्र संहता भवन्ति ॥ १४५ ॥

यस्य राज्ञः, दण्डः चक्रतार्थैः विपक्षः सन्, न व्याघोटते प्रत्यावर्तते, यत्प्रणीतं दण्डं न कोऽप्यतिवर्तते इत्यर्थः । व्याघुटन्ति पलायन्ते ॥ १४६ ॥

प्रपद्यते विस्तृणोति उदीरयतीति यावत् । प्रपद्यन्ति श्रोतयन्ति ॥ १४७ ॥

कुलदेवताः गृहदेवताः, 'यज्ञादीयमन्ने गोत्रे यदेऽपि कश्चित् कृतम्' इति विश्वः ॥ १४८ ॥

उदितस्य विरक्तस्य । दाक्षवेदिनः यज्ञाद्यङ्गदक्षस्य ॥ १४९ ॥

भेदते निन्दति, भिद् निन्दायामित्यस्य भौवादिकस्य प्रयोगः । समदर्शनः समदृष्टिः, विचारादिकाले सर्वं विश्वः परीवेविभेदरहितमिति यावत् ।

पितृन् पूरयति यावे यज्ञयज्ञैव यः सदा ।
पूर्वेन्दे पितरस्तस्य प्रसादैरुदितोदितम् ॥ १५१ ॥
न प्रगल्भायते मिथ्याप्रबलैर्यः कदाचन ।
याजौ प्रगल्भते दोर्भ्यां द्विषां विघटयन् घटाः ॥१५२ ॥
प्रकाशयते यज्ञा व्योम्नि चन्द्रः संपूर्णमण्डलः ।
प्रकाशयते तथा भूमौ प्रजानां नयनोत्सवः ॥ १५३ ॥
यज्ञस्याऽन्ते द्विजातिभ्यो दातुं ह्रयति यो धनं ।
वैश्वदेवकुलध्वाजादयमस्तर्पयतीव यः ॥ १५४ ॥
विनाऽपराधमारब्धान् न खेटति मृगानसौ ।
खेटयत्यरिवीरांश्च संग्रामरसिकान् नृपः ॥ १५५ ॥

परीवादम् अपवादम् ॥ १५० ॥

उदितोदितं प्राज्ञम् पण्डितमिति यावत् । १५१ ।

याजौ युद्धे, द्विषां रिपूणां घटाः सङ्घान्, विघटयन् विश्लेषयन्, प्रगल्भते प्रभुत्वमभिमानमाविष्करोति । १५२ ।

नयनोत्सवः नयनानन्दकरः । प्रकाशयते विभाति । १५३ ।

वैश्वदेवकुलध्वाजादिति । वैश्वेषु देवागारेषु यानि देवकुलानि प्रतिष्ठितदेवस्थानानि, तद्ध्वाजान् तदपदेशेन, यद्वा, वैश्वानि यज्ञस्थानानि, देवकुलानि देवस्थानानि, तद्ध्वाजान्, यज्ञातीयमये लोके मठेऽपि कचित् कुलमिति विदुः । यशः कीर्तिं, सर्पयति दीपयति, यज्ञदेवप्रतिष्ठायशदानैर्मेदिनीं कीर्तिमण्डितां-तीति भावः । १५४ ।

विनाऽपराधमित्यादिनाऽस्य यज्ञयाज्यकलराहित्यं विवक्षितम्, तद्यथा, 'वर्जयेत् सुरापानं यज्ञयागं वर्जयेन् सदा' इति । खेटयति इत्यर्थः । १५५ ।

मनुते मनुतुल्योऽसौ प्रजानामनवद्यवत् यशः।
पितृवच्चनुते तस्य मान्यं जनपदः सदा ॥ १५५ ॥
पितैवितनयति श्रीम रत्नाभरणरश्मिभिः।
यतोयता चरितेन यस्य पितरीयते जनः ॥ १५७ ॥
यो न कुप्यति विप्राय क्षुप्यते च महाप्रभुः।
प्रभोपचत्यसौ राजा यज्ञेन यजते जनः ॥ १५८ ॥
ईहे विविष्टपस्थाने यद्गुणांधारचक्रजः।
स्वयं पुण्यक्षितोर्वीशैरीड्यत्वमपि ॥ १५८ ॥
यजते पुण्यतीर्थेषु हयमुख्यानि यत्नितः।
यजत्यरिसैन्यानि युधि पृष्ठेषु सायकैः ॥ १६० ॥

मनुतुल्यो वैवस्वतमनुसदृशः। प्रजां प्रजापतिसमूहम्, आत्मजवत् पुत्रमिव, मनुते पश्यति, अपत्यनिर्विशेषेण प्रजाः पालयतीत्यर्थः, उक्तञ्च,—'राजानः पितरः प्रोक्ताः पुत्रा जनपदास्तदा। अतो भूपाः पालयन्ति प्रजाः पुत्रानिवौरसान्' इति। १५६।

पितैः पितृभिः, रत्नाभरणरश्मिभिः नानाविधवीरत्नादिभूषणकिरणैः, श्रीम आत्मानं, पितयति रञ्जयति। पितीयते पितृतुल्यो भवति। पितीयते इति कण्ड्वादियक्षमध्ये पितीयतिकल पाठात् कः, आत्मनेपदेन आत्मनेपदञ्च। १५७।

चारुचक्रजः देवयन्दिवन्दं, विविष्टपस्थाने स्वर्गलोके, यद्गुणान्, ईहे चेष्टते, ईह चेष्टायामित्यस्य रूपम्। विट् आपत्यम् पौत्री वक्ष इति विदीक्षा वृक्षः, पृषोदरादित्वात् साधुः। ईहयति चेष्टति, यद्गुणानित्यनुषङ्गः। १५८।

पुण्यतीर्थेषु, यत्नितः खनित्रवानुद्धारैश्च, हयमुख्यानि अश्वमेधादियज्ञानि, यजते यजति, ददातीति यावत्, महाफलत्वं यदुक्तं देवीपुराणे, 'हयमेधो नमाहात्म्य पुत्रानो अश्वमेधजौ। ऐलमहो मखे रौद्रे अश्वमो पूजनेऽनघे। त्रिवीना पूजयित्वा तु सहिमे यः अश्वमेधि। त्रिवलस्याय विप्राय

निःग्रेषयति यः शत्रून् ग्रेषदीर्घभुजध्वजः ।
निःग्रेषयति दानेन भाण्डागारं दिने दिने ॥ १६१ ॥
सुखं यत्र सुप्यन्ति बहवो वणिजो द्विजाः ।
प्रोच्छन्ति प्रचुरैरेषामभावेन दीनतां प्रजाः ॥ १६२ ॥
उद्भ्राम्यन्ते परं लोके ये भिक्षाव्रतचारिणः ।
न दीना दुःखिताः केचिद्भ्रम्यन्ति यत्र मण्डले ॥ १६३ ॥
न भाङ्क्षति जनः कञ्चिन्नाक्षाङ्क्षति परस्त्रियम् ।
सर्व्वोऽपि धार्म्मिकस्तुष्टस्तस्य राष्ट्रे क्षितौ जनः ॥ १६४ ॥

दीक्षिता वा वर्णेषु वा । न विद्यते अरीणां सुनयोपनीतेः क्षतः । वादरंहसरेणामैर्मण्डिताम्बरपुरं विजं । इति ॥ १६० ॥

ग्रेषदीर्घ भनभाजम्, दीर्घौ भुजध्वजौ बाहुदण्डौ यस्य, तद्भावस्तत्त्वं: । 'भुजे भुजङ्गेन्द्रसमानसारे' इति रघुः । भवनम् निःग्रेषयति उन्मूलयति । भाण्डागारं धनागारं, दानेन, निःग्रेषयति शून्यं करोति ॥ १६१ ॥

यत्र देशे यदीयराष्ट्रे, बहिनो द्विजाः सबहवः ब्राह्मणाः, सुखमनायासलभ्यं, यथा भवतितिक्षेत्रः, सुप्यन्ति उत्सहन्ते । एषां द्विजानां, प्रचुरैश्च बहुभिरेव धनैश्च, प्रजाः जनसमूहः, दीनतां दारिद्र्यं, प्रोच्छन्ति त्यजन्ति । प्रोच्छतीति प्रपूर्व्वस्य तौदादिकस्य उछ त्यागे धातोरयं प्रयोगः । प्रेच्छन्तीति पाठस्तत्त्वमपपाठो न साधुः ॥ १६२ ॥

यत्र देशे यदीयराष्ट्रे, ये भिक्षाव्रतचारिणः भिक्षाभुजो ब्राह्मणाः, ब्रह्मचारिणः छात्राः, ते परं अतिशयेन, उद्भ्राम्यन्ते दीयन्ते, अयत्नलभ्येन प्रचुरैश्च भिक्षाभिक्षं सुखं जीवन्तीति भावः । भिक्षाभुजेन ब्रह्मचारिणो इत्यभाह मनुः,—भैक्षेण व्रतपौरिक्षं नैष्ठिकादौ भवेदृतौ । भैक्षेण व्रतिनोऽपि स्युरुपवासव्रतसमा यदा' । इति ॥ १६३ ॥

भाङ्क्षति कदाचं रौति, भाषणार्थं करीतीत्यर्थः । भाङ्क्ष धोरक्षते इत्यस्य

उद्यच्छते न कस्याऽपि धर्मं धर्मपरायणः।
उद्धरति गोष्ठीषु सर्व्वेषामेव यो गुणान् ॥११५॥
तेपन्ते यस्य चक्षेन्दोर्ज्ञानक्षान्तविन्दवः।
यं वीक्ष्य तेपते क्षीणा वपुः जरमराहतम् ॥११६॥
क्षमते यो दरिद्राणां दुष्टान् न क्षमति प्रभुः।
न क्षाम्यति द्वितीयागामपराधक्षमामपि ॥११७॥
तितिक्षते क्षमी यस्तु सापराधेषु साधुषु।
तेजयन्ति यमाक्रम्य सर्व्वथा च सतां गिरम् ॥११८॥
यस्य योगनिमग्नस्य भोगतृष्णा क्षयायते।
क्षयते दीर्घसंसारग्रन्थिक्षाम्यनिमित्तयात् ॥११९॥

क्षीणादिक्षत प्रदीपः ॥ ११४ ॥

उद्यच्छते उच्छिनत्ति। गोष्ठीषु सभासु, सर्व्वेषां गुणान्, उद्धरति विद्यतीति, सर्व्वमेव तत्सम्बन्धात् गुणानुद्धरणं पूजां लभत इति भावः ॥ ११५ ॥

यस्य चक्षेन्दोः सुखचन्द्रात्, क्षान्तक्षान्तविन्दवः क्षान्तिसुधाकणिकाः, 'सुधाकणेषु क्षावायाक्षरक्षलनिधाक्षरा। प्रतिभाति यदर्केषु तक्षावक्षमिक्षीयते' इति सूपाक्षः। तेपन्ते क्षरन्ति। तेप क्षरणे दृक्षक्ष प्रदीपः। वपुः शरीरं, जरमराहतं क्षामधावपीडितं सत्, तेपते तेपते ॥ ११६ ॥

तितिक्षते क्षमते, तिज निशामनयक्ष सनक्षक्ष प्रदीपः। सतां साधूनां, गिरं वचनम् उपदेशनिरितियावत्, आक्रम्य अभिभूय, साधुवाक्यक्ष प्रतिसूक्षापरत्वं क्षलेतिभावः, यं राजानं, तेजयन्ति तीक्ष्णं कुर्व्वन्ति अतो दृति शेषः। उत्पक्षप्रतिपक्षेक्षयमतितीक्ष्णो भवतीति भावः ॥ ११८ ॥

भोगतृष्णा उपभोगवाञ्छना, क्षयायते क्षयुर्भवति। क्षान्तनिमित्तयात् क्षन्तानुक्षन्धात्, दीर्घसंसारग्रन्थिः सुभाक्षभक्षर्व्वरूपं सहजं बन्धनं, क्षयते निर्विडीभवति ॥ ११९ ॥

विश्राणयति यः श्रीमान् विप्रेभ्यो विपुलं वसु ।
विश्वचक्षुरिव तेऽभ्यर्च्या सत्यवाचः सदाग्नयः ॥ १७० ॥
व्यायामदृढदेहोऽपि मन्दते यो न सुन्दरः ।
मन्दायते क्वचित् कार्ये प्राक्षते च न कर्हिचित् ॥१७१॥
अपमृत्युं परित्यज्य सुखं प्राप्नोति यत्प्रजा ।
न प्राक्षते पुरं तस्य प्रतिकूलं करोति यः ॥ १७२ ॥
यो न क्षुभ्यति पूर्वेषां क्षितिं राज्ञां तदासने ।
पातुं क्षुभ्यति शावल्यं नेत्राञ्जनपुटेन यः ॥ १७३ ॥
दधते यः सदाचारं सदाचारिव संस्तुतः ।
दधते शासनं यस्य शिरसा च नरेश्वराः ॥ १७४ ॥

वसु धनं, 'वसु तोये धने मणौ' इति मेदिनी। विश्राणयति ददाति, 'आमी वितरणं दानवसूत्सर्जनविसर्जने। विश्राणनं वितरणम्' इत्यमरः। चाग्नयः चामीर्मादान्, विश्वचक्षुरिव ददति। सत्यवाचश्चनेन तेषामाग्नेयानां अमोघत्वं सूचितम् । १७० ।

मन्दायते चलती भवति। मन्दश्चलादात् भ्वादित्वात् क्यङ् । १७१ ।

प्राक्षति क्षीयति। प्रतिकूलं करोति विप्रियमाचरति, तस्य राज्ञः, पुरं नगरं, न प्राक्षते विनश्यति, रिपुपुरं भवत्वात् करीतीति भावः । १७२ ।

पूर्वेषां राज्ञां क्षतुभवतीनां, क्षितिं भर्त्तारां सम्भावयतीति शावत्, तदासने तस्य क्षुभ्यते, न क्षुभ्यति उच्चलयति, शादरोदिराजकथाक्षुभारवतीत्यर्थः। यदा, शावीभराजधर्माधिकारम् उच्चेतुं न शक्नोति। शावल्यं क्षीरदधि, रसवीयं मथ्नाति शावत्, पातुम् अत्यादरेण ग्रहुं, क्षुभ्यति उत्सुकीभवति । १७३ ।

सदाचारैव शावल्यः सदिनेव शावरत्नेन, यदा, राजधर्मानुशीलितेव

ददते द्रविणं भूरि याचकेभ्यः सदैव यः।
ददते याचकाश्चैव सन्तुष्टा नित्यमाशिषः ॥ १७५ ॥
भ्रंशते दुरितं राष्ट्रे प्रजाभ्यो यत्प्रभावतः।
पूर्णमाशा मरीचेव अक्षतारिपताकिनी ॥ १७६ ॥
प्रमादेनाऽपि देवाग्निगुरुभ्यः प्रणते न यः।
साक्षात् कृतागसं कोपात् दासीमपि न शप्यति ॥१७७॥
नटन्ति नाटके यस्य चरितं भरतादयः।
नाटयन्ति स्फुटं तेषां पताकाविध्वजद्रुमाः ॥ १७८ ॥

याचेन विचारवाक्येन दैन्येन, संजातः उत्पन्नः, याचना ; सदा सर्वदा, चारेण प्रविधिवर्तनेन, संजातः। दधते इति औणादिकस्य दध धारणे धातोः प्रयोगः। १७४।

मरीचेव याचनसूत्रेण, पूर्णमाशा प्रतीक्षा, अक्षतारिपताकिनी रिपुसेना, अक्षतानि भूमौ निपतन्ति। १७५।

कृतागसं कृतापराधं, दासीमपि, न प्रणमति नमस्करोति। १७७।

भरतादयः नटप्रभवाः, यथा, भरतो नाम सौधर्मिकस्तूपचारी नाटाचार्य-प्रवर्तकी मुनिः, तत्प्रसूताः, यस्य राज्ञः, चरितं वृत्तं, नाटके, नटन्ति नाटयन्ति अभिनयन्तीति यावत्, नाटयं सौधर्मकं। तेषां नटीप्रसूतमुनिकानां भरतादीनामिमकं, पताकाविध्वजद्रुमाः पताकाधिष्ठातादिदेवाः सन्तः, स्फुटं यथा, नाटयन्ति सौधर्मके, नाटयन्तीति प्रेरणादिवर्तनेन सौधर्मेण नटयन्तीः प्रवीयः। नाटयन्तीति प्रेरणार्थकं यथा,—'पताकाध्वजं सौधं इन्द्रियाणीव यद्गुरुं' रघुवंशम्,—'यानि शास्त्राण्यधीयते' इत्यादि शाकिवदर्थके। पताकाध्वजमारोपा विविध-क्रीडावदत्वात् नाटकवदाचरत्। भरतादयश्चात्र भरतीहरत् इत्यादौ पुस्तकेषु पाठो न क्वचीत्यतया उद्धृतः। १७८।

यो न वञ्चयति क्वचित् सदा सत्यपरायणः।
वञ्चन्ति च मरुद्धन्वं शुचयो दिशु तद्गुणाः ॥ १७९ ॥
होमाग्निधूमसुरभिः पवते मारुतो मृदुः।
गोदावरीतरङ्गार्द्रः पुनाति भुवि यत्प्रजाः ॥ १८० ॥
यो मिमीते च मीमांसां तदर्थमनुतिष्ठति।
पशवोऽपि न मीमन्ति यद्वै ते दुःखपीड़िताः ॥ १८१ ॥
सुखं शयति यास्तेयमिक्ष्वेवच्च कर्षति।
यत्प्रसादादविघ्नातक्षेमोजनपदः सदा ॥ १८२ ॥
श्रीकण्ठे श्रीकरैः सर्व्वैः वायवोदधिशोषणैः।
चन्द्रावतीतरङ्गार्द्राः श्रीकयन्ति च यद्रिपुः ॥ १८३ ॥

वञ्चयते प्रतारयति। वञ्चन्ति वञ्चन्ति, साहश्येन प्राप्नुवन्तीत्यर्थः। शुचयो-निर्मलाः ॥ १७९ ॥

मीमांसा नाम विचारपूर्व्वकतत्त्वनिर्णायकः ग्रन्थभेदः। मीमांसा च द्विविधा कर्म्ममीमांसा ब्रह्ममीमांसा चेति। कर्म्मकाण्डवेदविचारग्रन्थः कर्म्ममीमांसा जैमिनिप्रणीता, सैव मीमांसात्वेन प्रसिद्धा पूर्व्वमीमांसा इत्युच्यते। ब्रह्मकाण्ड-वेदविचारग्रन्थश्च ब्रह्ममीमांसा वेदव्यासादिप्रणीता, सा वेदान्तत्वेन प्रसिद्धा उत्तरमीमांसा इत्युच्यते। मिमीते यथाविचारयति। तदर्थं मीमांसोदितकर्म्मादि अनुतिष्ठति सम्पादयति। मीमन्ति प्रलपन्ति यागेनादं कुर्व्वन्तीत्यर्थः ॥ १८१ ॥

यास्तेयं यास्यचेयम्। जनपदो देशः, देशवासी जनस्तद्भूः इति यावत् ॥१८२॥

सर्व्वैः यादवैः, दधिक्षीरादेः दधिक्षत्तुद्रव्यैः, श्रीकरैः जलकणैः, श्रीकण्ठे शिवा अवनि, श्रीश्च ईशे इत्यत्र प्रयोगः। चन्द्रावतीतरङ्गार्द्राः चन्द्रावती-क्षीरविधौतशुभ्रीतवाः, यादव इति शेषः, यद्रिपुर्यस्य राज्ञः अरीरं, श्रीकयन्ति शुभ्रयन्ति ॥ १८३ ॥

मध्यावनि सहाराजाने नाशपदरोध कथन।

परं मध्यति शाःखः परागमनरोधनः ॥ १८४ ॥
विलसन्ति धनैस्तृप्ता ये च रङ्गोपजीविनः।
लासयन्ति रसाभिज्ञा यस्याऽग्रे भरतोत्तमाः ॥ १८५ ॥
विलासयन्ति यं हृद्या बलवन्तोऽपि मन्मथाः।
विलयत्यवलागात्रं हृदयं मदनज्वरा ॥ १८६ ॥
असौ प्रक्रमते जेतुमिन्द्रोऽपि बहुभिः सह।
नाशक्नुवन्ति तथाप्येनं विलासिन्यो बलवोऽपि ते ॥ १८७ ॥
वियन्ति वीरसन्तानं हृदो यस्य कुलाङ्गनाः।
विजायन्तेऽवबोधाय यत्कुलस्थितिवर्धनाः ॥ १८८ ॥
प्रथते पृथुवद्वृत्तस्य पृथिव्यामुज्ज्वलं यशः।
प्रथयन्ति पृथीयांसो गुणाः स्वर्गे च निर्भयाः ॥ १८९ ॥

नाशनाने सभायां, तेन राज्ञा, वरटः अभिप्रायितः, अवन जीवति जनः, न मध्यावते ब्रूते, नाशटः अजविदब्रूवादिविमनुजरथादितिनाशः। वारि निश्चयीति शाःखः वारपालकः, 'प्रतीहारि वारपालवेत्रा:खिलदर्भका:' इत्यमरः ॥१८४॥

भरतोत्तमाः नटश्रेष्ठाः, लासयन्ति मुग्धमेनुखं प्रकाशयन्ति, यथा, नाटचादिरसभिज्ञयन्ति ॥ १८५ ॥

विलासयन्ति चलनर्दयन्ते, पलायन्ते इति यावत्। मदनज्वरा अरतज्वरः, अवलाना हृदयं, विलयति द्रवीभूतं करोति ॥ १८६ ॥

प्रक्रमते यत्नते। प्रपूर्वक्रमाद्दात्मनेपदम् ॥ १८७ ॥

वियन्ति अवयन्ति। अवबोधाः प्रबोधाणि ॥ १८८ ॥

पृथुवत् वैपुल्य पृथुराजवच्च। प्रथते प्रकाशं भवति। प्रथयन्ति प्रकाशयन्ति

यमन्ति व्याधयोऽप्येनं न कदाचिद्भयादिव ।
यामयन्ति यमन्यच्च तमुग्रङ्गं करोत्यसौ ॥ १९० ॥
वेवेष्टि पिष्टपं सर्व्वं कीर्त्तिर्यस्याऽतिशायिनी ।
विष्णाति विषवत् प्राणान् त्रयीधर्म्मद्विषामसौ ॥१९१॥
निःश्रेषं श्रेषति क्रोधात् प्रतिपक्षक्षमापतीन् ।
एकः श्रेषति योऽश्रेषभूतानां भरणे ध्रुवम् ॥ १९२ ॥
क्षिपति प्रतिपक्षाणां हृदये यो भयं ध्रुवम् ।
क्षिप्यति श्रोत्रियाणाञ्च निष्कं पुष्कलमालये ॥ १९३ ॥

भवन्ति ॥ १८९ ॥

व्याधयो रोगाः, एनं राजानं, न यमन्ति गच्छन्ति अभिभवन्तीति यावत् । यम् अन्यच्च जनम्, यामयन्ति पीडयन्ति, व्याधय इत्यनुषङ्गः । असौ राजा, तं व्याधितं जनम्, उग्रङ्गम् अतिक्रमणीयं व्याधिनिर्भुग्नमितिभावः, करोति ॥ १९० ॥

यस्य राज्ञः, अतिशायिनी सर्व्वातिरिक्ता, असम्भवसाधारणैश्वर्य्यः, कीर्त्तिः, पिष्टपं भुवनं, वेवेष्टि व्याप्नोति । ष्टादिगणीयस्य विषधातोः प्रयोगः । असौ राजा, त्रयीधर्म्मद्विषां वेदत्रयीदितधर्म्मविघातकानां, प्राणान्, विषवत् विषमिव, विष्णाति वियोजयति संहरतीति यावत् ॥ १९१ ॥

प्रतिपक्षक्षमापतीन् प्रतिकूलान् राज्ञः, निःश्रेषं श्रेषति समूलम् उन्मूलयति । एकः असहायनिरपेक्ष इत्यर्थः, अश्रेषभूतानां निखिलप्रजानां, भरणे, श्रेषदाचरति । यथा एक एव जनः सकलघराभारं बिभर्त्ति तथा सोऽपि राजेतिभावः ॥ १९२ ॥

श्रोत्रियाणां छान्दसानाम्, आलये गृहे, पुष्कलं प्रचुरं, श्रेष्ठं वा, यथा चतुःषष्टिद्विपरिमितं, यदुक्तं,—'चतुःषष्टिर्भवेत् कुडवः कुडवोऽष्टौ च पुष्कलम्' इति । निष्कं सुवर्णं, क्षिपति ददाति । १९३ ॥

कपति खिन्धया वाचा सर्वैरेव समं प्रभुः।
सजदृष्टैरपि प्रेक्ष्य साक्षादं कापथत्यजी ॥ १८४ ॥
यौति काले कुलस्त्रीभिः चेत्रसन्तानरक्षये।
युनाति यौवनस्थोऽपि न वेश्यावन्धकीजनैः ॥ १८५ ॥
न रीजयति यः कश्चित् प्राचिनां कदयान्वितः।
तस्य धर्मरतेः रोगा न त्यजन्ति प्रजामपि ॥१८६॥
मत्तवैद्यामसौ विद्वान् न क्षेष्यति धृतव्रतः।
न क्षेष्ययति सर्वज्ञो विवादे वादिभिः सह ॥ १८७ ॥
सम्यग्यते मतिर्यस्य त्रैलोक्योऽपि खगेश्वरत्।
सम्यग्यति पुनः क्षेमां सागरान्तां मक्षीतलं ॥ १८८ ॥

यो राजा, कामी अनुत्कामी, क्षेत्रसन्तानरक्षये स्वकलत्रपुत्ररक्षार्थं, मनु कामीय-भीमायेतिभावः, कुलस्त्रीभिः स्वदारैः, यौति सङ्गच्छते, 'अनुत्कामाभिलाषी स्यात् स्वदारनिरतः सदा' इति मनुस्मरणादितिभावः। यौवनस्थोऽपि तरुणीऽपि प्रवलेन्द्रियत्वात्तीऽपीत्यर्थः, वेश्यावन्धकीजनैः वारनारीकुटाम्बिभिः, न युनाति सङ्गच्छते। यु सङ्गमे इत्यस्य प्रयोगः। १८५ ॥

कदर्यान्वितः कार्पण्यिकः, यो राजा, प्राचिनां मध्ये कञ्चिदपि न रीजयति खिनत्ति। धर्मे रतिरनुरागो यस्य तस्य राज्ञः, प्रजामपि रोगा न त्यजन्ति पीडयन्ति धर्मरतेरिवास्य धर्मरत इत्यादर्शपुस्तकपाठो न साधुः। १८६ ॥

धृतव्रतः कृती राजा, मत्तवैद्यां मद्यादिसेविकामध्ये, न क्षेष्यति अपचिं यास्यन् न उद्धारयति, यद्वा, मत्तवैद्यां मायथामद्यरिवारपर्वतो मद्यादर्शनेति ख्याते पर्वते देशे, न क्षेष्यति क्षेष्यमाणमपचीयं निवारयति। १८७ ॥

यस्य मतिः बुद्धिः, त्रैलोक्योऽपि त्रिभुवनेऽपि, खगेश्वरत् खगेन्द्रे इव सम्यग्यते, त्रिभुवनव्यापिनी निजपरिजनादिव पक्षतीत्यर्थः, 'उदारचरितानां तु वसुधैव

सुखं निंसे सुखं स्त्रीषां यत्प्रजा प्रतिपालिता ।
निंसति स्तमन्नधोक्षपोक्षाधिगन्धादिकम् ॥ १९९ ॥
हट्टेव यं विघटते कोपाक्षेपो मृगीदृशाम् ।
विघाटयति चाक्कोटे वैरिणां करिणां घटा ॥२००॥
निस्तनन्ति न दुःखार्त्तास्तद्दे ये निरुपद्रवे ।
स्तनयत्युच्चगर्जेन पर्जन्योऽपि न भीतवत् ॥ २०१ ॥
रसन्ति मधुरैः कण्ठैर्यस्योद्याने पतत्रिणः ।
रसयन्ति सुखाद्यानि तत्करप्रतिपालिताः ॥ २०२ ॥
सज्जते मल्लिकास्वग्रे यस्मियश्रोत्रियोऽप्यऽसौ ।
सज्जते मल्लिकाभाश्च वार्त्ता कर्णगता पुनः ॥ २०३ ॥

कुटुम्बकम् इति भावः । सम्पद्यते इति हृद्यः समपूर्वकत्वात् आत्मनेपदं, विषयाभिमुखकर्मकत्वञ्च ॥ १९८ ॥

निंसे चुम्बति, निंसमधातोः प्रथमः । निंसति चुम्बति ॥ १९९ ॥

मृगीदृशां हरिणनयनानां, कोपाक्षेपः मानाख्यकोपकृतं सर्जनं, विघटते अपसरति । चाक्कोटे यस्मा चाटुमन्दं सति, वैरिणां करिणां घटा विपक्षगज-समूहः, विघाटयति पलायते ॥ २०० ॥

निस्तनन्ति मदन्ति चार्त्तनादं कुर्वन्तीत्यर्थः । स्तनयति गर्जति । पर्जन्यः मेघः । भीतवत् राजदण्डभयेन अङ्कितवत् ॥ २०१ ॥

यत्पत्रिणः यस्मिन्, मधुरैः श्रीभाभिरामैः, कण्ठैः, रसन्ति कूजन्ति । तत्करप्रतिपालिताः तस्मै जनाः, सुखाद्यानि सुमिष्टपानभोजनानि, रस-यन्ति आस्वादयन्ति । 'रसद्यानि तत्करप्रतिपालिताः' इत्यादर्शपुस्तकपाठो न समञ्जसः ॥ २०२ ॥

मल्लिका वेश्या, तस्याग्रे तत्संसर्गे । मल्लिकानां वेश्यानां, वार्त्ता संवादः,

शोचयति हारिद्राकर्दमे पतितान् गवान् ।
तूदयत्यपि देवेन्द्रं संग्रामे भुजविक्रमात् ॥ २०४ ॥
नाऽद्रिर्हंयते कश्चित् विषया यादृशा नवा ।
यदि प्रमादाद्दयति तच्चित्तं नावसीदति विषम् ॥ २०५ ॥
शोचयत्यतिनिःसारं संसारं सारवानसौ ।
न शोचति सदाचारो यो हतानपि बान्धवान् ॥२०६॥
यं परिक्षिप्य सन्नद्धा यदवन्ते पदातयः ।
आहवे राजसञ्जोष यस्य सम्पद्यते ध्रुवम् ॥ २०७॥

अकंगता यदि भवति, तदाऽपि लभ्यते, दुःखजनी सारवारीसंसर्गः, यदसाम्प्रतमपि नाऽसौ सहतइतिभावः । २०३ ।

शोचयति उद्धरति । देवेन्द्रं तूदयति इन्द्रेण तुल्यौ भवति, तूद परिमाणे दुखस्य प्रयोगः । २०४ ।

अद्रिः सर्पः । यादृशा विषया विषइव नवीव । विषं न आवसति न सहरति । २०५ ।

हतानपि बान्धवान् न शोचति हतबन्धुदर्शेन अनुशोचनदयं शोकविषं न प्रकाशयति, यत्र यावल्क्याः 'शुचेयानु चक्षुभिर्मुखं प्रेतो सुकृते यशोऽयनः । अतो न रोदितव्यं हि क्रिया: कार्याः समग्रिताः । इति । 'अजनायु क्रियाऽतिसज्जनं दहति प्रेतमिति प्रचक्षते' इति रघुः । २०६ ।

पदातयः पादचाराः योधाः, पादाभ्यां यन्तीति पदातिः, पादस्य पदिमादिना पदादेशः, 'पदातिपत्तिपदमपादातिकपदाजयः' इत्यमरः । यं राजानं, परिक्षिप्य परिवार्य, सन्नद्धानि बद्धपरिकराणि अरयोधयोग्यान् रिपूनिति यावत्, पदवन्ते गच्छन्ति । आहवे युद्धे, राजसञ्जोः अयशोः, तस्य राज्ञः, सम्पद्यते सम्पन्ना भवति, सर्वेषु अवश्यं समवतरतीत्यर्थः । २०७ ।

यत्र संचलयति द्यूतं प्रतिपक्षचमामुखि।
संभवेऽर्थं ततो भूमिं क्षेमदस्थिरदादिकम्॥ २०८॥
श्रियं हरोऽपि यद्भूषां न प्रहर्षति यत्सदा।
यया प्रहर्षति श्रुत्वा सत्कवीनां सुभाषितम्॥२०९॥
धर्मे सर्वस्वदानेऽपि यस्य दीक्षायते न धीः।
दीक्षयत्परिवर्गस्य जीविताग्राच्च यः सदा॥ २१०॥
याचते वाहिनीं शत्रुं बाहुभ्यामाहवेषु यः।
यजते विहतारातिर्वपुरूपस्य यः श्रियम्॥ २११॥
खेदते खिद्य सर्वोऽपि वपुषानुक्षरन्मितः।
न च खिद्यति तत्त्वाज्ञं व्यायामार्जितमेदसः॥ २१२॥

यत्र प्रतिपक्षचमामुखि यस्मिन् शत्रुभूपादौ, द्यूतं सुरचितं सैन्यं, संचलयति संचलन्तं प्रदायमानं प्रेरयति, रथकोष्ठाश्वहस्त्यादि सैन्यं प्रेरयतीत्यर्थः। ततः प्रतिपक्षात् राज्ञ इत्यर्थः। संचलयतीति प्रेरणार्थे चिजन्तस्य चमू शब्दे इत्यस्य प्रयोगः॥ २०८॥

सर्वस्वस्य दानं यत्र याचकेऽपि धर्मे सर्वस्वदक्षिणे विश्वजिदादौ यज्ञे, यस्य धीः बुद्धिः, न दीक्षायते दीक्षेव आचरति, सर्वस्वं ददामि न वेति चित्तवांस्तदा न भवतीत्यर्थः, यद्वातस्मिन् यज्ञे सर्वस्वमुत्सृजतीति भावः॥ २१०॥

वाहिनीं सैन्यं। याचते प्रार्थयते, याच प्रार्थने इत्यस्य प्रयोगः। विहतारातिः विनाशितशत्रुः, श्रीः राजा, वपुरूपस्य विष्णोः, श्रियं लक्ष्मीं, वैकुण्ठसुखभोगसहितनिजार्थं, यद्वा, वपुरूपस्य आत्मदेहस्य श्रियं शोभां दर्पमिति यावत्, यजते यारचयति। २११।

खेदते खिद्यते वपुषात् शरीरी, उत्क्षरन्मितः सूक्ष्मात्, आतपतापादिभयैः, खेदते घर्मार्तदेही भवति। खिद्यति घर्मार्तं भवति। २१२।

अलिचित्राणि वस्त्राणि धूयन्ते यत्र कौतुकात्।
वैश्वानिका वयन्ते च पट्टिकोत्पाटिकादिकम्॥ ॥२१३॥
वाति वातः पुरे यत्र तावत्यत्रैव भीतवत्।
उदायति यदा स्त्रीणां खेदार्द्रं हरते वपुः॥ २१४॥
अर्जन्ति विविधाभिश्च धूलिभिर्यत्र वाजिनः।
अर्जयन्ति च हालेन सप्तानेन पदातयः॥ २१५॥
यावच्छति रवौ मौर्वीमसौ यावद्भिनत्त्यदः।
तावदाच्छति यद्भूपां नम्रतां धूलिपद्धतिः॥ २१६॥

अलिः रचना, तया चित्राणि मनोहराणि। धूयन्ते वयन्ति, यत्र तन्तुवायानां इत्यत्र विसूर्मकत्व प्रयोगः। वैश्वानिकाः त्रिजगनिपुणाः। पट्टिका पटं कौषेयमिति यावत्, उत्पाटिका इत्यत्र नीरसा अत्र, अत्रत्यचक्रमिरीमजभेदेन यत्रत्र चातुर्विध्यात्, यदुक्तं, 'चतुर्विधं तु विज्ञेयं अत्रत्यचक्रमिरीमजम्' इति। वयन्ते इति वैद्य तन्तुवायानां इत्यत्र प्रयोगः॥ २१३॥

यदा यावता वायुना, खेदार्द्रं स्वेदक्लिन्नं, वपुः शरीरं, उदायति इच्छति। उदायतीति वै धातोः इत्यत्र उत्पूर्वकत्व प्रयोगः। 'आङ्पूर्वस्यदिरत्यन्तं कुसुमस्तेवसाभवात्। न याति वायुसंपर्कं लाक्षादिवाधिकम्।' इति कुमारः॥ २१४॥

अर्जयन्ति विविधवस्तूनि उत्पन्नाः अपनीयर्थः। अर्जं वस्त्रादावीदित्यत्र पुरादिवर्णीयत्व प्रयोगः। पुरादेः वैः वहाधिदर्शनत्वात् यथा चीरतीवृदारवं, तथा पचे अर्जतीति पदम्॥ २१५॥

मौर्वीं धनुर्गुणम्, यावच्छति यावता करोति। यावच्छति यावता अवति, याति यावादि इत्यत्र औणादिकत्व प्रयोगः॥ २१६॥

मोदन्ते यदुयाने मारुतं पुष्परेणवः ।
मत्तानां गन्धमाघ्राय मोदन्ते तत्पुरस्त्रियः ॥ २१७ ॥
यद्विराजमनक्षत्रमाग्नेयत्वेन हृष्यति ।
यतः प्रवीयते तस्य परमाणुविनिश्चयात् ॥ २१८ ॥
याति गङ्गाजलैर्नित्यं देवो यत्र त्रिविष्टपम् ।
यः यावति जगत् सर्वं विततन्तुभिर्गुणैः ॥ २१९ ॥
यत्प्रजागासुपर्णेभ्यः पर्वभ्योऽपि न गर्व्वति ।
गर्व्वन्ति यावच्चान्येभ्यागास्तु तस्कराः ॥ २२० ॥
इदं धर्म्मे विशन्यस्य यस्य न व्यथते पदम् ।
अयति स्वर्गलोकाय न कीर्त्तिः सुकृतात्मनः ॥ २२१ ॥
स्मरति स्निग्धया वाचा सर्व्वानानन्दयन्वसौ ।
स्मरयन्नतिरुष्टोऽपि न कदाचित् परिग्रहम् ॥ २२२ ॥

पुष्परेणवः कुसुमपरागाः, मारुतं वायुं, मोदयन्ते सुरभीकुर्व्वन्ति । मोदन्ते नन्दन्ति । २१७ ।

एधति वर्द्धते । यवीयते यवधिः वर्द्धते । अग्न्यादिशब्दमध्ये वर्द्धिशब्दस्य पाठात् अधूतनद्यावार्थे अण् । परमाणुविनिश्चयात् ब्रह्मानुसन्धानात् । २१८ ।

विततन्तुभिः यथाऽतूलतन्तुभिः, अतिनिर्घनैः क्षीणत्वेन दयादाक्षिण्यादिभिरित्यर्थः । जगत् पृथिवीं यावति वेष्टते, व्याप्नोतीत्यर्थः । वेञ् वेष्टने इत्यस्य प्रयोगः । २१९ ।

यस्य पदं मर्य्यादा, न व्यथते न यच्छति । सुकृतात्मनः पुण्यशीलस्य, यस्य कीर्त्तिः, सर्व्वलोकाय न व्यथति न यच्छति यच्छतीति यावत् । २२१ ।

स्मरति स्मरयति यावयतीति यावत् । परिग्रहं परिजनं, न स्मरयति नाभिविषयति मर्य्यादयतीति यावत्, स्मरयतीति स्मर याचेरे इत्यस्य पदस्य

समन्ति यद्विरोगेण सीमन्तिन्यः क्षरातुराः।
यः सामयति सामग्रः स्त्रिग्धैरालोकनैश्च ताः ॥२२३॥
हिताहितं प्रजानां यः प्रेक्षते नित्यमाजनम्।
प्रेषयत्यखिलानाञ्च धर्म्मसिद्धिं नियोगिनाम् ॥२२४॥
अभिलषति साधूनामुदयं सर्व्वतोदयः।
साधुलोकोऽपि निःसीमां तस्याऽभिलषते श्रियम् ॥२२५॥
क्षायः क्षाम्यति नाक्रन्दे यस्य प्रहरतो रिपून्।
क्षामन्ति रिपुवेगाश्च प्लवमाना दिशो दश ॥ २२६ ॥
यः स्वप्नेनाऽपि नाक्षीयं गुणं कुत्राऽपि कत्थते।
कथयत्यादिराजानां चरितानि सहस्रशः ॥ २२७ ॥

चुरादिगणीयस्य प्रयोगः ॥ २२२ ॥

यद्वियोगे यस्य राज्ञः विरहे, सीमन्तिन्यः कामिन्यः क्षरातुराः क्षामपीडिताः सत्यः, समन्ति विक्षया भवन्ति। सम वैक्लव्ये दैवादिक प्रयोगः। सामग्रः प्रियवचनरचनाचतुरः, मानिनीमानविघातदक्षप्रतिभावः, यदुक्तं साहित्यदर्पणे, 'मृदु प्रियवचः साम' इति। स्निग्धैः मधुरैः, आकूतैः वाञ्छितैः, ताः विरहातुराः सीमन्तिनीः, सामयति सान्त्वयति। साम सान्त्वने दैवादिक प्रयोगः ॥२२३॥ आत्मना स्वयम्। नियोगिनां स्वादिकार्य्ये नियुक्तानाम् ॥ २२४ ॥

आक्रन्दे दाहक्षयुक्ते, 'आक्रन्दः क्रन्दने क्षामे नियदाहक्षयुक्तयोरिति मेदिनी। रिपून् शत्रून्, प्रहरतः निघ्नतः, यस्य राज्ञः, क्षायः क्षयः, न क्षाम्यति क्षामो-भवति। प्लवमानाः पलायमानाः ॥ २२६ ॥

कत्थते श्लाघते प्रशंसतीति यावत्। कथयति कीर्त्तयति। कत्थते इति कत्थ श्लाघायामित्यस्य प्रयोगः ॥ २२७ ॥

व्यनक्ति यच्छरीरस्थं लक्षणं सार्वभौमताम्।
अध्वयन्ति च गोदानं यज्ञेषु याजिका द्विजाः ॥२२८॥
आबोटन्ति नखैरङ्गं सुखमाबोटयन्ति च।
यद्यूनश्चलतवैधव्या रुदत्योऽरिकुलस्त्रियः ॥ २२९ ॥
सम्माग्रयति यः यत्नात् सङ्कलैरखिलानपि।
विपाग्रयति चात्मानं ग्रानं कर्मक्षयं नयन् ॥२३०॥
घूर्णते ग्राग्रवस्थाऽपि यद्गुणश्रवणाच्छिरः।
मित्रोदासीनभूतानां घुणतीति किमद्भुतम् ॥२३१॥

सार्वभौमतां चक्रवर्तिता, व्यनक्ति सूचयति, चक्रवर्तिलक्षणोपेतोऽसौ राजा इति भावः। याजिकाः यज्ञयाजिनः, द्विजाः ब्राह्मणाः, गोदानं केशान्तनामकसंस्कारं, यद्वा यज्ञे धेनुदानरूपं कर्म, अध्वयन्ति द्योतयन्ति, यथाशास्त्रं सम्पादयन्तीत्यर्थः ॥ २२८ ॥

नखैः नखाघातैः, अङ्गं शरीरं, आबोटन्ति, छिन्दन्ति, श्रीकोन्मत्ततयेति भावः। सुखम् आबोटयन्ति विनाग्रयन्ति। यस्य व्यूढेन सुरचितेन सैन्येन कृतं वैधव्यं विधवायाः गतभर्तृकायाः भावः, पतिविनाश इत्यर्थः, यासां ताः, अतएव: रुदत्यः विलपनपराः ॥ २२९ ॥

सम्माग्रयति बध्नाति। ग्रह बन्धने इत्यस्य सम्पूर्वस्य प्रयोगः। आत्मानं जीवात्मानं, कर्मक्षयं शुभाशुभकर्मविनाशजन्यं, ग्रानम् आत्मज्ञानमित्यर्थः, नयन् ग्रापयन्, विपाग्रयति भवपाशात् मोचयति, आत्मानमितिशेषः। २३०।

ग्राग्रवस्थ अनुवृत्तेः। मित्रोदासीनभूतानामिति। कस्यचित् राज्ञः सदाऽभीमानस्तरमैः यस्य राज्यं स तस्य परिः, तदनन्तरं तु यस्य राज्यं स प्रथमस्य मित्रम्। तदासीनभूतस्तु अनुमित्राद्या परतरो राजा, विजिगीषोः अनुमित्रभूमिनौ व्यवहितः, व्यवहितत्वादेव मोपकारी नाप्युपकारी केवलं मूढमासीन इव, तेषां शिरो मूर्खा, घुणति भ्रमति। २३१।

यस्य लक्ष्मीर्विकसति प्रजा धर्मेण रक्षितुः।
विकायन्ते च भूयांसो गुणाः सप्तपदारिवः॥ २१२॥
क्रियन्ति बालका: काकं क्रीड़न्ति स्थविरा अपि।
प्रशातव्याधिदौर्गत्यविप्लवा यस्य मण्डले॥ २१३॥
यः कूटयति शत्रूणां हृदा गजघटा रवे।
संकुटन्ति भयाक्रान्ता: शत्रवो यस्य दर्शनात्॥ २१४॥
क्षपते क्षपचेष्वेव क्षपाचार्जितविक्रमः।
प्रचुरं पथितोऽप्यर्थं नाऽसौ क्षपयति प्रभुः॥ २१५॥

धर्मेण राजधर्मं पुरस्कृत्य, प्रजा: प्रकृतीः, रक्षितुः पालयितुः, यस्य राज्ञः, लक्ष्मीः राजश्रीः, विकसति नितरां प्रकाशते वर्धते इति यावत्। सप्तपदारिवः सप्तमपुरुषाः सुताः दयादाविच्छादयः, विकायन्ते क्रीडन्ते। रक्षितुरित्यत्र रक्षिता इत्यादर्शपुस्तकपाठो न साधुः॥ २१२॥

स्थविराः वृद्धाः। व्याधिः रोगः, दौर्गत्यं दारिद्र्यादिदुःखं, विप्लवः परचक्रादितो भयं खराष्ट्रोपद्रवो वा, ते प्रशाताः प्रशमनमूताः यैः, ते तादृशाः। मण्डले सुविकृते राज्ये॥ २१३॥

गजघटाः करिसमूहान्, कूटयति दलति विनाशयतीति यावत्। संकुटन्ति भयेन चाकुञ्चितदेहा भवन्ति॥ २१४॥

क्षपचेषु क्षपापाचेषु जनेषु, क्षपते दयते, क्षपां प्रदर्शयतीति यावत्। क्षपाचेन चण्डेन दौर्गत्यप्रदर्शनेनेत्यर्थः, अर्जितः विक्रमः पराक्रमः येन सः, सुजनसङ्गत्यप्रतापपरत्वैः। क्षपयति दुर्वशो भवति। प्रचुरमपि अर्थं दानमित्यर्थः। 'क्षपाचार्जितविक्रमः' इत्यत्र 'क्षपचार्जितविक्रमः' इति पादर्शपुस्तकपाठो न साधुः॥ २१५॥

अजस्रमम्बुभिः मवुस्रोतां धौतमिवाधिकम् ।
यदयशः श्वेतते दिक्षु: श्विन्दते च सुरालये ॥ २३६॥
कुमस्थलं पत्ययति पथयत्युत्तरापथम् ।
यत्खड्गखण्डिताशेषप्रचण्डरिपुमण्डलम् ॥ २३७ ॥
क्रादते स्निग्धगम्भीरं यद्देशे वर्षूको घनः ।
ह्लादते यस्यलोभेन लघीयलजनोऽप्यलम् ॥ २३८ ॥
ज्योत्स्नाच्छलेन मूर्च्छन्ति यद्गुणाः यशलाङ्गने ।
न तं स्फूर्च्छति यत्राऽसौ तुष्टः सद्धृदयः प्रभुः ॥ २३९ ॥
द्रुणोति द्रीणवद्युद्धे शरजालेन यो रिपून् ।
द्रुणति प्रकृतौ यस्य दिङ्मुखेषु रिपुव्रजः ॥ २४० ॥

अधिकम् अधिकतरं, श्वेतते शुक्लं भवति, स्वतः शुक्लस्यापि यशसो रिपुनारीनयनजलप्लावितत्वात् श्लीलाधिक्यं श्रेयम्। श्विन्दते श्वेतं भवति। श्वित-श्विन्दयोः श्लीलार्थयोः प्रयोगः ।२२६ ।

कुमस्थलं काम्यकुलदेशम्। उत्तरापथम् उत्तरदिग्भागम्। पत्ययति पथयति चेति गच्छतीत्यर्थः, तच तच पलायतइतिभावः । २२७ ।

वर्षुकः वर्षकशीलः, लषपतपदेत्यादिना उकञ्प्रत्ययः। घनो मेघः, स्निग्धगम्भीरं यथा स्यात् तथा ह्रादते गर्जति। लघिरस्यास्तीति लघीयलः, कर्षकइत्यर्थः, रजःलघ्यादिना मतुप्प्रत्ययः, मस्य इति दीर्घः। ह्लादते आह्लादितोभवति । २२८ ।

सद्धृदयः सामाजिकः गुणग्राहीत्यर्थः, असौ प्रभुः राजा, यत्र यस्मिन् जने, तुष्टः, कीऽस्य प्रीतिकरं सत्कर्म करोतीत्यर्थः, तं जनं, न स्फूर्च्छति विजरति ।२२९।

द्रीणवत् द्रीणाचार्यइव, शरजालेन बाणसमूहेन, रिपून् द्रुणोति उपतापयति। रिपुव्रजः शत्रुसमूहः, दिङ्मुखेषु दिगन्तरेषु, द्रुणति गच्छति

लक्ष्मीमालिङ्गति खेदाद् यः सदा धरणीपतिः।
आलिङ्गयति रत्नांशुजालेन मणिकुट्टिमम् ॥ २४१ ॥
रथान् सवति संग्रामे स्वयमेव जवेन यः।
सोमं सुनोति यज्ञेषु परलोकजिगीषया ॥ २४२ ॥
मनो मादयते यस्य योगाभ्यासरसायनम्।
सर्व्वलोकातिशायिन्या विभूत्या च न माद्यति ॥२४३॥
स्निह्यति ज्ञातिवर्गेषु खेदयत्यात्मबन्धुषु।
रणे शूरयते यश्च शूर्य्यते विदिषां बलम् ॥ २४४ ॥
यः शीलति सदा धर्म्मं शीलयत्यात्मनो हितम्।
न च स्तमति शोकेन न च दुःखेन ताम्यति ॥ २४५ ॥

पल्लायतदत्यर्थः। २४० ।

मणिकुट्टिमं मणिमयबद्धभूमिं, रत्नांशुजालैः रत्नाभरणरश्मिभिः, आलिङ्गयति रञ्जयति। २४१ ।

संग्रामे युद्धे, रथान् सवति प्रेरयति। षु प्रेरणे इत्यस्य प्रयोगः। परलोकजिगीषया स्वर्गकामनया, यज्ञेषु सोमं यज्ञाङ्गभूतां सोमलतां, सुनोति निष्पीडयति, यज्ञे सोमलतां निष्पीड्य तद्रसं पिबतीत्यर्थः। षु अभिषवे इत्यस्य स्वादिप्रयोगः। २४२।

योगाभ्यासरसायनं ब्रह्मानुसन्धानरूपं, महौषधं, यस्य मनः मादयते आनन्दयति। सर्व्वलोकातिशायिन्या लोकोत्तरया, विभूत्या सम्पदा, न माद्यति मत्तीभवति। २४३।

रणे युद्धे, शूरयते पराक्रमते। विदिषां शत्रूणां बलं सैन्यं, शूर्य्यते विनाशयति। २४४।

धर्म्मं शीलति चरत्यनिशं आचीर्णवतीति यावत्। शीलेन वृत्तेनाचि-

छिनत्ति नित्यमज्ञानं छेदयत्यक्षितोदयम् ।
श्रीणाति धीः सदा यस्य श्रीयति श्रीश्च भूतले ॥२४४॥
यः क्षेपति सतां मार्गं गवेषयति सत्क्रियाम् ।
यत् किञ्चिदप्यधीतेऽधी यदध्येति तदक्षयम् ॥ २४७ ॥
आलोचते सदा नीतिमालोचयति सत्क्रियाम् ।
आलोकन्ते यमबला नालोकयति यश्च ताः ॥ २४८ ॥
यो न कुत्सयते कुत्सां मतु कुत्सति निर्धनम् ।
न भर्त्सयति कर्मस्थान् मतु भर्त्सयते परान् ॥२४९॥
मण्डयन्ति गुणाः सर्वं यो गुणानेव मण्डति ।
भूषणं भूषयत्यन्यं यस्तु भूषति भूषणम् ॥ २५० ॥
उन्मूलयति यः शत्रूनुन्मूलयति तमांसि च ।
राष्ट्रं पीड़ति नालीयं पीड़यत्यरिमण्डलम् ॥ २५१ ॥

क्षतेन, न क्षमति विक्षयी न क्षयति, क्षम वैक्लव्ये इत्यस्य प्रयोगः । २४५ ।

श्रीः बुद्धिः, श्रीणाति वर्धते । श्रीश्च राजलक्ष्मीश्च श्रीयति वर्धते । श्रीध इत्ती इत्यस्य प्रयोगः । २४६ ।

सतां मार्गं सदाचारपद्धतिं, क्षेपति अवलम्बते । गवेषयति अन्वेषयति । गवेष अन्वेषणे इत्यस्य चुरादिगणीयस्य प्रयोगः । २४७ ।

मण्डयन्तीत्यादि । गुणाः शौर्यधैर्यक्षमादाक्षिण्यादयः, सर्वं अर्थं, मण्डयन्ति भूषयन्ति । श्री राजा गुणानेव मण्डति भूषयति, गुणाः सर्वेण उत्कर्षवता-पीऽपि यत्र आधारभूतेन सर्वमेव उत्कर्षं लभन्ते इत्यर्थः । एवं यस्तु भूषण-मपि भूषति अलङ्कारमप्यलङ्करोतीत्यर्थः । 'अलङ्गेपण्यमलङ्कार' इति कुमारः । २५० ।

निवर्हयति युद्धाऽरीन् तपसा यो निवर्हते।
ऊर्ध्वा ऽर्हति च यः पूजां युद्धेऽपीन्द्रमहमर्हति ॥२५२॥
भक्त्या नमति यो देवान् नमस्यति गुरून् द्विजान्।
दधदि रोदसी कीर्त्या स्वधर्ममनुरुध्यते ॥ २५३ ॥
दिवा निद्रायते नाऽसौ न निद्राति च सन्ध्ययोः।
न स्पृध्यति परद्रव्यं नच गर्हयते परम् ॥ २५४ ॥
तूर्यते न क्वचित् कार्ये त्वरते धर्म एव यः।
ध्वनन्ति यद्गुणान् मर्त्या ध्वनयन्ति च खेचराः ॥२५५॥
तर्जते योऽहि भूपालान् न तर्जयति सज्जनम्।
न दुनोति परं वाचा दुर्जनोक्त्या न दूयते ॥ २५६ ॥

युद्धा नीतिशास्त्रानुसारिण्या मत्रया, अरीन् शत्रून् निवर्हयति विनाशयति। तपसा तपोबलेन, निवर्हते दीप्यते। ऊर्ध्वा ऊर्जे, पूजाम् सत्कारम्, अर्हति भजति। युधे, इन्द्रोऽपि स्वयं देवराजोऽपि, तं राजानम्, अर्हति पूजयति ॥ २५२ ॥

ऊर्ध्वा यशसा, रोदसी द्यावाभूमी, दधदि आपूरयति। स्वधर्मं प्रजापालनरूपं राजधर्मम्, अनुरुध्यते सर्वप्रयत्नेन रक्षति ॥ २५३ ॥

सन्ध्ययो सायं प्रातश्च, यदुक्तं,—'चित्वामां रजनीं प्राहुस्तस्याद्यनवचतुष्टये। नाडीनां तदुभे सन्धी दिवसाद्यनसंज्ञिते। इति। परद्रव्यं परधनं, न स्पृध्यति तदभिलषति ॥ २५४ ॥

तूर्यते त्वरते। ध्वनन्ति कीर्तयन्ति। मर्त्याः मानवाः। खेचराः नभोविहारिणः देवगन्धर्वादयः ॥ २५५ ॥

वाचा अप्रियवचनेनेत्यर्थः, परं न दुनोति उपतापयति। दुर्जनोक्त्या दुर्जनवाक्येन च, न दूयते स्वयं दुःखितो न भवति ॥ २५६ ॥

न सूदते मतिर्यस्य यः सूदयति भाववम् ।
चिकित्सति जगद्व्याधिं साधु केत्सयति प्रजाः ॥२५७॥
सत्यं सङ्गिरते यश्च रटयति सुभगं वचः ।
यो भुङ्क्ते भुवनं धर्म्मै यस्य धीर्न भुजत्यलम् ॥ २५८ ॥
पलम्ति यद्विषो दिक्षु दुरितञ्च पलायते ।
जहाति दुर्जनैः सङ्गं जिहीते सज्जनाश्रयम् ॥ २५९ ॥
खिद्यति धर्म्मएवाऽसौ नेन्द्रियार्थेषु लीयते ।
जायन्ते यस्य सत्पुत्रा जयन्ति च गुणोदयाः ॥ २६० ॥
यः पृथ्वीं पाति पायन्ति यत्प्रभावाच्च यत्नवः ।
चित्तं रजति नारीणां स्वयं ता अनुरज्यते ॥ २६१ ॥
रटत्यविदुषां सङ्गं रटयत्यप्रियं सदा ।
कीर्त्तिर्भ्राम्यति यस्योर्व्यां गुणाः स्वर्गे भ्रमन्ति च ॥२६२॥

यस्य मतिः बुद्धिः, न सूदते भ्रश्यति । भाववं रिपुकुलं, सूदयति विनाशयति ॥ २५७ ॥

सत्यं सङ्गिरते प्रतिजानीते । सुभगं वचः मधुरं वाक्यं, रटयति उदीरयति । धर्म्मं यस्य धीः बुद्धिः, न भुञ्जति, कुटिला भवति, सरलात्मना धर्म्मं सेवते इत्यर्थः, भुज कौटिल्ये इत्यस्य तौदादिकस्य प्रयोगः । २५८ ।

यद्विषः यस्य अरयः, दिक्षु पलन्ति गच्छन्ति पलायन्तइत्यर्थः । दुरितं पापं पलायते अपसरति । सज्जनाश्रयं साधुसङ्गं, जिहीते प्राप्नोति । २५९ ।

पृथ्वीं धरणीं,पाति रक्षति । यत्प्रभावात् यस्य प्रतापेन,अरयः,पायन्ति गच्छन्ति, वशवर्त्तिनो भवन्तीत्यर्थः । नारीणां चित्तं रजति तस्मिन् अनुरक्तं भवति ।२६१।

अविदुषां मूर्खाणां, सङ्गं संसर्गं, रटति परिहरति । अप्रियं रटयति अनङ्गत्वं तिरस्करोति । २६२ ।

मानं यच्छति चौरां यच्छते दिवतां शिरः।
प्रीणति दियतः सर्व्वान् शुचत्यपि च तत्पुरम् ॥२४२॥
अर्थापयति याच्ञादि नाऽधमर्णयतेऽन्यतः।
विभाजयति यो दुग्धं सभाजयति सज्जनान् ॥२४३॥
शुभस्थानं च धामि च धर्म्मं शुम्भति यः सदा।
वेदान् गदति विस्पष्टं नघाऽन्धं मघति क्वचित् ॥२४४॥
मन्नाति शुचिमाहारमश्नुते च परन्तपः।
दृष्टते सर्व्वकार्य्येषु शुक्लं दृष्यते दिवाम् ॥ २४५ ॥
शिवं यज्ञयते भक्त्या विभूत्या यत्र यज्ञति।
यः खेटति सतां मध्ये स खोटति निराश्रयः ॥२४७॥
गाधते याच्ञमत्यर्थं गाधते नाऽधमन्यतः।
योऽन्ने गुध्नाति तद्गृं तत्प्रचयादेव गुध्यति ॥२४८॥

सर्व्वान् दियतः अपून्, प्रीणति दृणाति। तत्पुरं अपुनरं शुचति दहति। २४१।

अर्थमाचष्टे इति याच्ञेन अर्थापयति। अर्थयते याचते। सभाजयति, पूजयति, सभाज पूजायामित्यस्य चदन्तस्य पुरादिगणीयस्य प्रयोगः। २४३।

दधिं दिवसम्, आहारं भक्ष्यादिकम्, मन्नाति भुङ्क्ते, 'सुपरीक्षितमन्नाद्य-मन्नाम्बुवीर्यविंवाघदैः' इति मनुस्मरणात्। अश्नुते आप्नोति। २४४।

यज्ञयते पूजयति यजति यजतिराचरति, सुदेवगुरुद्विजभक्तौ राज्ञे-दित्यादिः। २४७।

गाधते दृष्यति। यो जनः, अर्थं याच्ञे, गुध्नाति शुध्यति, तत्प्रचयात् अधि-क्षिप्तं, तद्गृं गुध्यति वेष्टते। २४८।

एजते राजचिह्नैर्यः एजयत्यखिलं जगत् ।
इध्मे युद्धेषु यत्तेजः एधते यः श्रियाऽधिकम् ॥ २६८ ॥
यः ग्रीटति सभामध्ये तं ग्रेटति निरीक्ष्य यः ।
प्रतिषेधति यः यत्नात् कार्यं तस्याशु सिध्यति ॥२७०॥
नयन्ते यद्गुणाः सर्वं यस्ताम्रयति दिङ्मुखम् ।
श्रिया स्रडति मृड्नाति सरस्वत्या च यः सदा ॥ २७१ ॥

एजते श्रीभते । इध्मे दीप्यते । यः श्रिया लक्ष्म्या, अधिकम् एधते वर्धते ॥ २६९ ॥

ग्रीटति गर्वं प्रकाशयति । ग्रेटति अवजानाति । प्रतिषेधति निवारयति । सिध्यति सम्पद्यते ॥ २७० ॥

श्रिया लक्ष्म्या, स्रडति तुष्यति । सरस्वत्या विद्यया मृड्नाति धानन्दितो-भवति ॥ २७१ ॥

इतिसमासमवानगुणोदयं कविरहस्यमिदं रसिकप्रियम् ।
सदभिधानविधानकलायुधद्विजवरस्य कृतिः सुकृतार्थिनः ॥
शुभमस्तु ॥

साङ्केतिकवर्णविज्ञापनम् ।

भू,	...	...	भ्वादिगणीयः ।
अदा,	...	..	अदादिगणीयः ।
जु,	...	...	जुहोत्यादिगणीयः ।
दिवु,	..	...	दिवादिगणीयः ।
सु,	...	...	स्वादिगणीयः ।
तुद,	...	...	तुदादिगणीयः ।
रुध,	...	...	रुधादिगणीयः ।
तन,	...	...	तनादिगणीयः ।
क्रीञ्,	...	...	क्र्यादिगणीयः ।
चुर्,	...	...	चुरादिगणीयः ।
दि-अन,		...	दिवादिः अनादिश्च ।
तु-कृ,	...	...	तुदादिः कुटादिश्च ।
तु-सु,	...	...	तुदादिः सुवादिश्च ।
क्री-पू,		...	क्र्यादिः पूवादिश्च ।
घटा,	...	...	घटादिः ।
चदस् धु,		..	चत्वारः अर्थाः धुरादिः ।
प,	...	...	परस्मैपदी ।
आ,	...	...	आत्मनेपदी ।
उभ,	...	...	उभयपदी ।
अक,	...	...	अकर्मकः ।
सक,	...	...	सकर्मकः ।
द्विक,	...	...	द्विकर्मकः ।
अनिट्,		...	यस्य इत्: अभावः ।
वेट्	...	...	यस्य इत्: भावः ।
वेट्,	...	...	यस्य इत्, विकल्पः ।

कविरहस्यधृतधातुविवरणम् ।

श्लोकसंख्या ।

६ । गुप् (भ्वा, प, सक, वेट्) रक्षणे ; गोपायति (१) ।

६ । गुप् (भ्वा, आ, सक) निन्दायां ; जुगुप्सते (२) ।

६ । गुप् (चु, प, सक) गोपने ; गोपयति ।

६ । गुप् (दि, प,अक) व्याकुलीभावे ; गुप्यति ।

७ । पृ (क्रया, प, सक) प्रीणने ; पृणाति ।

७ । पृष् (तु, प, सक) प्रीणने ; पृषति ।

७ । प्री (क्रया, प, सक) प्रीणने ; प्रीणाति ।

७ । पृ (स्वा, प, सक) प्रीणने ; पृणोति ।

७ । प्री (दि, आ, अक) प्रीती ; प्रीयते ।

७ । प्री (भ्वा, उभ, सक) प्रीणने ; प्रयते ।

७ । प्री (चु, प, सक) प्रीणने ; प्रायपति ।

८ । धू (स्वा, उभ, सक) कम्पने ; धूनोति ।

८ । धु (स्वा, उभ,सक) कम्पने ; धुनोति ।

८ । धू (क्रया-पु्रा, उभ, सक) कम्पने ; धुनाति ।

८ । धू (तु-क्रु, प, सक) कम्पने ; धुवति ।

---

(१) 'जनक्षतीगृधूधूपपचपनी जिडीयङावापु:' इति सूत्रेण गुपधातो: आय-प्रत्यये कृते, गुपे, धातुसंज्ञायाञ्च गोपाय इति धातौ क्विप् ।

(२) 'क्विन्प्रत्ययपः सन्नीम्' इत्यादिसूत्रेण सन्विधाने, इच्छनिषेधे, जुगुप्सी-मीति गुप्तनिषेधे, दिते, जुगुप्स इति आयङ्ग धातुसंज्ञायाञ्च तिप् ।

श्लोकसंख्या ।

८ । धू (आत्मः, प, सक)(विपूर्व्वकः) कम्पने ; विधूनयति(२)।

८ । धू (भ्वा, उभ, सक) कम्पने ; धवति ।

८ । जॄ (दि, प, अक) अरायां ; जीर्य्यति ।

८ । जॄ (क्रया, प, अक,) अरायां, वये ; जृणाति ।

८ । जूर् (दि, आ, अक) अरायां, वये ; जूर्य्यते ।

८ । ज्या (क्रया-घ्रा, प, अक) अरायां, वये ; जिनाति ।

८ । जॄ (भ्वा, प, अक) अरायां, वये ; जरति ।

८ । जॄ (चु, प, सक) अरायां, वये ; जारयति ।

१० । ह्वप् (स्वा, प, सक) प्रीणने ; ह्वप्नोति ।

१० । ह्वप् (भ्वा, प, सक) प्रीणने , तर्पति ।

१० । ह्वप् (चु, प, सक) प्रीणने ; तर्पयति ।

१० । ह्वप् (दि, प, सक, वेट्) प्रीतौ ; ह्वप्यति ।

११ । व्री (क्रया-घ्रा, प, सक) वरणे, प्रार्थने ; व्रीणाति, व्रियाति ।

११ । ह्व (क्रया, आ, सक) वरणे, प्रार्थने ; ह्वणीते ।

११ । ह्व (स्वा, उभ, सक)(आङ्पूर्व्वकः) आवरणे ; आह्वणोति ।

११ । ह्व भ्वा, प, सक) वरणे, सेवायां ; वरति ।

११ । ह्व (क्रया, प, सक) वरणे, प्रार्थने ; ह्वणाति ।

---

(२) 'धीधूवीरंन् वा' इति नन् । नपीऽभावपक्षे धन्योची ह्वी धावयति इति पदम् ।

श्लोकसंख्या ।

११ । वर (अदन्त-चु, प, सक) वरणे, प्रार्थने ; वरयति ।

११ । व्री (दि,आ, सक,) वरणे, प्रार्थने ; व्रीयते ।

११ । ह (चु, प, सक) वारणे ; वारयति ।

११ । ह (भ्वा, आ, सक) (निपूर्वक) निवारणे ; निवरते ।

१२ । अन्थ् (चु, प, सक) अन्थने, रचने ; अन्थयति ।

१२ । अन्थ् (भ्वा, प, सक) अन्थने, रचने ; अन्थति ।

१२ । ग्रथ् (चु, प, सक) ग्रन्थने, रचने ; ग्राथयति ।

१२ । ग्रथ् (भ्वा, प, सक) ग्रन्थने, रचने; ग्रथति ।

१२ । ग्रन्थ् (क्रया, प, सक) ग्रन्थने, रचने ; ग्रन्थाति ।

१३ । स्फुट् (तु-कु, प,अक) विकासे ; स्फुटति ।

१३ । स्फुट् (भ्वा, आ, अक) विकासे ; स्फोटते ।

१३ । स्फुट् (भ्वा, प, अक) भेदे ; स्फोटति ।

१३ । स्फुट् (चु, प,सक)(आङ्पूर्व्वकः) भेदने ; आस्फोटयति ।

१४ । वस् (अदा, आ, सक) परिधाने ; वस्ते ।

१४ । वस् (चु, प, सक) (निपूर्व्वः) निवासे ; निवासयति ।

१४ । वस् (दि, प, अक) दर्पे ; वस्यति ।

१४ । वस् (चु, प, सक)(प्रपूर्व्वकः) निर्व्वासने ; प्रवासयति ।

१४ । वस् (चु, प, सक) सुरभीकरणे ; वासयति ।

